## सप्तम: अनुच्छेद:

अस्मान् परित: यत् अस्ति, तदेव परिवेश: । विशेषत: अरण्य-जल-पवनप्रभृतय: प्राकृतिक- परिवेशस्य मूलम् । सम्प्रति जनसंख्याया: वृद्धे: कारणात् परिवेश: दूषित: भवति इति परिवेशविशेषज्ञा: वदन्ति । निरक्षरता, अविवेकिता, स्वार्थपरता च परिवेशप्रदूषणस्य मुख्यकारणम् । पुरा जना: वृक्षच्छेदनं पापमिति अचिन्तयन् । अत: जना: आम्र-विल्व-पनस-वट-पिप्पलप्रभृतीन् वृक्षान् अपूजयन् । जले वरुणदेव: निवसति इति ज्ञानेन तत्र आवर्जनादिकं न अक्षिपन् । सम्प्रति मानवा: धनोपार्जनाय बहुसंख्यकानि शिल्पागाराणि स्थापयन्ति । फलत: तेभ्य: शिल्पागारेभ्य: निर्गत: धूमराशि: वायुमण्डलं दूषयति । वृक्षच्छेदनम् इदानीन्तनानां मानवानां दैनन्दिनं कर्म भवति । वृक्ष: अङ्गारकाम्लं नीत्वा अम्लजानं त्यजति । अम्लजानस्य ग्रहणं कृत्वा जीवा: जीवन्ति । अरण्यं वृष्टे: नियन्त्रणं करोति । अत: अरण्यम् एव जीवनम् । अरण्यस्य सुरक्षया जीवनस्य रक्षा भवति । निजगृहस्य परिवेश: यदि सुन्दर: भविष्यति तर्हि विश्वस्य परिवेश: अपि हसिष्यति । अत: सर्वे स्व गृहवाटिकायामेकम् एकं वृक्षं रोपयन्तु तस्य यत्नं नयन्तु च । तेन परिवेशस्य सुरक्षा भविष्यति ।

### प्रश्ना:

1. **एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

   (क) विश्वस्य परिवेश: केन प्रकारेण हसिष्यति ?

   (ख) वायुमण्डलं किं दूषयति ?

   (ग) परिवेशप्रदूषणस्य मुख्यकारणं किम् ?

2. **एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

   (क) पुरा जना: किं पापमिति अचिन्तयन् ?

   (ख) जले क: देव: निवसति ?

   (ग) जीवा: किं गृहीत्वा जीवन्ति ?

   (घ) अरण्यं कस्य नियन्त्रणं करोति ?

●●●